वाह्यं, क्ली, (वाह्यते चाल्यते इति वाहि + ण्यत् ।) यानम् । यथा, हेमचन्द्रे ।
"यानं युग्यं पत्रं वाह्यं वह्यं वाहनधोरणे ॥"
वाह्य:, त्रि, ( वह + ण्यत् । ) वहनीय: । ( यथा, रघु: । ६ । १० ।
"मनुष्यवाह्यं चतुरस्रयान-
मध्यास्य कन्या परिवारशोभि ।
विवेश मञ्चान्तरराजमार्गं
पतिंवरा कॢप्तविवाहवेशा ॥"
वहिस् + ष्यञ् ।) वहि: । वाहिर इति भाषा । यथा, स्मृति: ।
"अपवित्र: पवित्रो वा सर्व्वावस्थां गतोऽपि वा ।
य: स्मरेत् पुण्डरीकाक्षं स वाह्याभ्यन्तर: शुचि: ॥"
वा(बा)ह्येन्द्रियं, क्ली, ( वाह्यमिन्द्रियम् । ) वहिरिन्द्रियम् । तद्यथा । चक्षु: । जिह्वा । नासिका । त्वक् । श्रोत्रम् । एतदेकैकगुणा: । यथा,—
"एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दका: ।
वाह्यैकैकेन्द्रियग्राह्या गुरुत्वादृष्टभावना ॥"
इति भाषापरिच्छेद: ॥
वाह्लिक:, पुं, वाह्लीकदेश: । इत्यमरटीकायां भरत: ॥ (तद्देशजाते, त्रि । यथा, महाभारते । १ । २२९ । ४६ ।
"एकाजानामपि चाश्वानां वाह्लिकानां जनार्द्दन: ।
ददौ शतसहस्राणि कन्याधनमनुत्तमम् ॥");
वाह्लिकं, } क्ली, कुङ्कुमम् । हिङ्गु । इत्यमर-
वाह्लीकं, } मेदिनीकरौ ॥
वाह्लीक:, पुं, देशभेद: । बलख् इति ख्यातो भाषा । तद्देशजातघोटक: । इत्यमरमेदिनीकरौ । गन्धर्व्वविशेष: । इति शब्दरत्नावली ॥ (प्रतीपपुत्रविशेष: । यथा, महाभारते । १ । ६५ । ४४ ।
"प्रतीप: खलु शैब्यामुपयेमे सुनन्दां नाम तस्यां पुत्रानुत्पादयामास देवापिं शान्तनुं वाह्लीकञ्चेति ॥" )
वि, व्य, निग्रह: । नियोग: । पदपूरणम् । निश्चय: । असहनम् । हेतु: । अव्याप्ति: । विनियोग: । ईषदर्थ: । परिभव: । शुद्धम् । अवलम्बनम् । विज्ञानम् । इति मेदिनी । वे, ७६ ॥ विशेष: । गति: । आलम्भ: । पालनम् । इति शब्दरत्नावली ॥ उपसर्गविशेष: । अस्यार्था: । वि विशेषवैरूप्यनञर्थगतिदानेषु । इति मुग्धबोधटीकायां दुर्गादास: ॥
वि:, पुं, स्त्री, ( वाति गच्छतीति । वा + "वातेर्डिच ।" उणा० ४ । १३३ । इति इण् । स च डित् । ) पक्षी । इत्यमर: ॥ ( यथा, साहित्यदर्पणे १० परिच्छेदे ।
"के यूयं स्थल एव सम्प्रति वयं प्रश्नो विशेषाश्रय: ।
किं ब्रूते विहग: स वा फणिपतिर्यत्रास्ति सुप्तो हरि: ॥")
विंश:, त्रि, ( विंशति + पूरणे डट् । तेर्लोप: । ) विंशते: पूरण: । इति सिद्धान्तकौमुदी ॥ (यथा, मनु: । ८ । ३९८ ।
"कुर्य्युरर्घं यथापण्यं ततो विंशं नृपो हरेत् ॥")

विंशक:, त्रि, (विंशत्या क्रीत: । विंशति + "विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम् ।" ५ । १ । २४ । इति ड्वुन् । "ति विंशतेर्डिति ।" ६ । ४ । १४२ । इति तिलोप: । ) विंशतिक्रीत: । इति सिद्धान्तकौमुदी ॥
विंशति:, स्त्री, ( द्वौ दश परिमाणस्य । पङ्क्तिविंशतीति निपातनात् सिद्धम् । ) संख्याविशेष: । बिश इति कुड़ि इति च भाषा । यथा,—
"विंशत्याद्या: सदैकत्वे सर्व्वा: संख्येयसंख्ययो: ।
संख्यार्थे द्विबहुत्वे स्तस्तासु चानवते: स्त्रिय: ॥"
इत्यमर: ॥
तद्वाचकानि । रावणबाहु: १ । अङ्गुलि: २ । इति कविकल्पलता ॥ नखम् ३ । इति सतुत्तत्व-मुक्तावली ॥
विंशतिक:, त्रि, विंशतियोग्य: । यथा । संख्याया: कन् स्यादार्हीयेऽर्थे । विंशतित्रिंशद्भ्यां कन् संज्ञायाम् । अन्यां कन् स्यात् असंज्ञायान्तु ड्वुन् स्यात् । विंशक: : संज्ञायान्तु विंशतिक: । इति सिद्धान्तकौमुदी ॥
विंशतितम:, त्रि, ( विंशते: पूरण: । विंशति + डट् । "विंशत्यादिभ्यस्तमडन्यतरस्याम् ।" ५ । २ । ५६ । इति तमडागम: । ) विंश: । इति सिद्धान्तकौमुदी ॥
विंशी, पुं, विंशति: । इति सिद्धान्तकौमुदी ॥
विकं, क्ली, सद्य:प्रसूताया गो: क्षीरम् । यथा,—
"क्षीरं सद्य:प्रसूताया: पेयूषं पालनं विकम् ।"
इति शब्दचन्द्रिका ॥
विकङ्कट:, पुं, गोक्षुर: । इति शब्दमाला ॥
विकङ्कत:, पुं, वदरीसदृशसूक्ष्मफलवृक्ष: । वँइच इति भाषा । तत्पर्य्याय: । स्वादुकण्टक: २ सुवावृक्ष: ३ ग्रन्थिल: ४ व्याघ्रपात् ५ । इत्यमर: ॥ स्रुग्वाक्ष: ६ मधुपर्णी ७ । इति रत्नमाला ॥ कण्टपाद: ८ बहुफल: ९ गोपघण्टा १० सुवाद्रुम: ११ मृदुफल: १२ दन्तकाष्ठ: १३ यज्ञीयब्रह्मपादप: १४ पिण्डार: १५ हिमक: १६ पूत: १७ किङ्किणी १८ वैकङ्कत: १९ व्रुतिङ्कर: २० कण्टकारी २१ । इति शब्दरत्नावली ॥ किङ्किरी २२ स्रुगदारु २३ । इति जटाधर: ॥ अस्य गुणा: । अम्लमधुरत्वम् । पाकेऽतिमधुरत्वम् । लघुत्वम् । दीपनत्वम् । कामलास्रशोधनाशित्वम् । पाचनत्वञ्च । इति राजनिर्घण्ट: ॥ अपि च ।
"स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि ।
विकङ्कतफलं पक्वं मधुरं सर्व्वदोषजित् ॥"
इति भावप्रकाश: ॥
विकङ्कता, स्त्री, अतिबला । इति राजनिर्घण्ट: ॥
विकच:, पुं, ( विगत: कचो यस्य केशशून्यत्वात् । यद्वा, विशिष्ट: कचो यस्य प्रभूतकेशत्वात् । ) क्षपण: । केतु: । इति मेदिनी । चे, ॥ ( यथा, वृहत्संहितायाम् । ११ । १९ ।
"विकचा नाम गुरुसुता:
सितैकतारा: शिखिपरित्यक्ता: ।

षष्टि: पञ्चभिरधिका
स्निग्धा याम्याश्रिता: पापा: ॥")
विकच:, त्रि, ( विकचति विकशतीति । वि + कच + अच् । ) विकसित: । इत्यमर: ॥ ( यथा, माघे । ११ । १९ ।
"विकचकमलगन्धैरन्धयन् भृङ्गमाला:
सुरभितमकरन्दं मन्दमावाति वात: ।
प्रमदमदनमाद्यद्यौवनोद्दामरामा-
रमणरभसखेदस्वेदविच्छेददक्ष: ॥"*॥
विगत: कचो यस्य ।) केशशून्य: । इति मेदिनी । चे, ॥ (यथा, महाभारते । ३ । २५९ । १२ ।
"विभ्रमन्नियतं वेशमुन्मत्त इव पाण्डव ।
विकच: परुषा वाचो व्याहरन् विविधा मुनि: ॥" )
विकचा, स्त्री, महाश्रावणिका । इति राजनिर्घण्ट: ॥
विकच्छ:, त्रि, ( विगत: कच्छो यस्य । ) कच्छरहित: । मुक्तकच्छ: । इति स्मृति: ॥
विकट:, पुं, ( विकटति पूयरक्तादिकं वर्षतीति । वि + कट + पचाद्यच् । ) विस्फोटक: । इति शब्दरत्नावली ॥ साकुरुण्डवृक्ष: । इति राजनिर्घण्ट: ॥ ( धृतराष्ट्रस्य पुत्रविशेष: । यथा, महाभारते । १ । ६७ । ९६ ।
"दुर्म्मदो दुष्प्रहर्षश्च विवित्सुर्विकट: सम: ॥")
विकट:, त्रि, (वि + "संप्रोदश्च कटच् ।" ५ । २ । २९ । इति कटच् ।) विशाल: । (यथा, माघे । १० । ४२ ।
"उत्तरीयविनयात्त्रपमाणा
रुन्धती किल तदीक्षणमार्गम् ।
आवरिष्ट विकटेन विवोढु-
र्वक्षसैव कुचमण्डलमन्या ॥")
विकराल: । इति मेदिनी । टे, ॥ सुन्दर: । इति विश्व: ॥ दन्तुर: । इति धरणि: ॥ (यथा, मार्कण्डेये । ४३ । २० ।
"करालैर्विकटै: कृष्णै: पुरुषैरुद्यतायुधै: ।
पाषाणैस्ताड़ित: स्वप्ने सद्यो मृत्युं लभेन्नर: ॥")
विकृत: । इति त्रिकाण्डशेष: ॥
विकटा, स्त्री, ( विकट + टाप् ।) मायादेवी । सा च बौद्धदेवीभेद: । तत्पर्य्याय: । मारीची २ त्रिमुखा ३ वज्रकालिका ४ वज्रवाराही ५ गौरी ६ पोत्रिरथा ७ । इति त्रिकाण्डशेष: ॥
विकण्टक:, पुं, (विशिष्ट: कण्टको यस्य ।) यवास: । इति जटाधर: ॥ वृक्षविशेष: । तत्पर्य्याय: । मृदुफल: २ ग्रन्थिल: ३ स्वादुकण्टक: ४ गोकण्टक: ५ काकनास: ६ व्याघ्रपाद: ७ घनद्रुम: ८ गर्जाफल: ९ घनफल: १० मेघस्तनितोद्भव: ११ सुदिरफल: १२ प्रावृष्य: १३ हास्यफल: १४ स्तनितफल: १५ । अस्य गुणा: । कषायत्वम् । कटुत्वम् । उष्णत्वम् । रुचिप्रदत्वम् । दीपनत्वम् । कफहारित्वम् । वस्त्ररङ्गविधायकत्वञ्च । इति राजनिर्घण्ट: ॥
विकत्थनं, क्ली, (विकत्थ्यते इति । वि + कत्थ श्लाघायाम् + भावे ल्युट् । ) मिथ्याश्लाघा । यथा,—